अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-301**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : तृतीयम्)**

**संस्कृतम्**

**प्रथमपत्रम्-संस्कृतव्याकरणम् (क)**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**अवधेयम्** : इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## (खण्डः – अ) 70 अङ्काः
## (काशिकावृत्तिः)

**प्रश्नः1– केषाञ्चित् त्रयाणां सूत्राणां काशिकारीत्या व्याख्यानं कर्त्तव्यम्।** (5X3=15)

(क) धातोरेकाचो हलादेः .........। (ख) तपस्तपःकर्मस्यैव । (ग) सुपि स्थः ।

(घ) ब्रह्मभ्रूणवृत्रेषु क्विप्। (ङ) आदृगमहनजनः किकिनौ लिट् च।

**प्रश्नः2– केषाञ्चित् पञ्चानां सूत्राणां पदकृत्यं दर्शयन्तु।** (3X5=15)

(क) प्रजार्य्योऽसम्मतौ। (ख) लुपसदचर० ........। (ग) वाऽसरूपोऽस्त्रियाम्

(घ) कर्तर्युपमाने। (ङ) कृमृदृरुहिभ्यश्छन्दसि। (च) अनुदात्तेतश्च हलादेः।

(छ) धातोः कर्मणः० ......।

**प्रश्नः3– केषाञ्चित् पञ्चानां वार्त्तिकानां व्याख्यानं कर्त्तव्यम्।** (3X5=15)

(क) कमेरुपसङ्ख्यानम्। (ख) दृशेः क्सश्च वक्तव्यः।

(ग) व्यधेः सम्प्रसारणं कुरच्च वक्तव्यः। (घ) खच्च डिद्वा वक्तव्यः।

(ङ) श्वेतवहादीनां डस्पदस्येति वक्तव्यम्। (च) जुहोतेर्दीर्घश्च।

(छ) द्विषः शतुर्वा वचनम्।

**प्रश्नः4– द्वयोः कारिकयो र्व्याख्यानम्।** (5X2=10)

(क) क्स्नोर्गित्त्वान्न स्थ ईकारः कङितोरीत्वशासनात्। गुणाभावस्त्रिषु स्मार्यःश्र्युकोऽनित्वं गकोरितोः।।

(ख) वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्। आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्।।

(ग) उदात्तत्वाद्भुवः सिद्धमिकारादित्वमिष्णुचः। नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते।।

**प्रश्नः5– प्रदत्तेषु त्रयाणां समाधानं कर्तव्यम्।** (5X3=15)

(क) 'द्विषतीतापः' इत्यत्र कः प्रत्ययः कथञ्च?

(ख) 'जुचङ्क्रम्यः' इत्यत्र 'ज्ञापनार्थञ्च पदिग्रहणमन्य'वर्णयन्ति' इत्यस्य व्याख्यानङ्कुर्वन्तु।

(ग) 'आढ्यसुभग०........' इत्यत्र 'अच्वौ' इति कुतो गृह्यते?

(घ) 'स्पृशोऽनुदके क्विन्' इत्यत्र 'कर्तरि' पदानुवर्तनस्य किं प्रयोजनम्?

**---------------x---------------**